# Shri Suryadivyakavacha Stotram 5

# શ્રીસૂર્યદિવ્યકવચસ્તોત્રમ્ ૫

## Document Information

Text title : Shri Suryadivyakavacha Stotram 5

File name : sUryadivyakavachastotram5.itx

Category : navagraha, kavacha

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : Hiranyagarbha Samhita

Latest update : April 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીસૂર્યદિવ્યકવચસ્તોત્રમ્ ૫

ૐ અસ્ય શ્રીસૂર્યનારાયણદિવ્યકવચસ્તોત્રમહામન્ત્રસ્ય
હિરણ્યગર્ભ ઋષિઃ । અનુષ્ટુપ્છન્દઃ શ્રીસૂર્યનારાયણો દેવતા ।
સૂં બીજં, ર્યાં શક્તિઃ, યાં કીલકમ્ ।
શ્રીસૂર્યનારાયણપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
કરન્યાસઃ ।
ૐ શ્રીસૂર્યનારાયણાય અઙ્ગુષ્ઠાભ્યાં નમઃ
પદ્મિનીવલ્લભાય તર્જનીભ્યાં નમઃ
દિવાકરાય મધ્યમાભ્યાં નમઃ ॥

ભાસ્કરાય અનામિકાભ્યાં નમઃ ॥

માર્તાણ્ડાય કનિષ્ઠિકાભ્યાં નમઃ ॥

આદિત્યાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

એવં હૃદન્યાસઃ
લોકત્રયેતિ દિગ્બન્ધઃ ।
ધ્યાનં
ત્રિમૂર્તિરૂપં વિશ્વેશં શૂલમુદ્ગરધારિણમ્ ।
હિરણ્યવર્ણં સુમુખં છાયાયુક્તં રવિં ભજે ॥

અથ સ્તોત્રમ્ ।
ભાસ્કરો મે શિરઃ પાતુ લલાટં લોકબાન્ધવઃ ।
કપોલૌ ત્રયીમયઃ પાતુ નાસિકાં વિશ્વરૂપભૃત્ ॥ ૧॥

નેત્રે ચાધોક્ષજઃ પાતુ કણ્ઠં સપ્તાશ્વવાહનઃ ।
માર્તાણ્ડો મે ભુજૌ પાતુ કક્ષૌ પાતુ દિવાકરઃ ॥ ૨॥

પાતુ મે હૃદયં પૂષા વક્ષઃ પાતુ તમોહરઃ ।
કુક્ષિં મે પાતુ મિહિરો નાભિં વેદાન્તગોચરઃ ॥ ૩॥

દ્યુમણિર્મે કટિં પાતુ ગુહ્યં મે અબ્જબાન્ધવઃ ।
પાતુ મે જાનુની સૂર્યો ઊરૂ પાત્વુરુવિક્રમઃ ॥ ૪॥

ચિત્રભાનુસ્સદા પાતુ જાનુની પદ્મિનીપ્રિયઃ ।
જઙ્ઘે પાતુ સહસ્રાંશુઃ પાદૌ સર્વસુરાર્ચિતઃ ॥ ૫॥

સર્વાઙ્ગં પાતુ લોકેશો બુદ્ધિસિદ્ધિગુણપ્રદઃ ।
સહસ્રભાનુર્મે વિદ્યાં પાતુ તેજઃ પ્રભાકરઃ ॥ ૬॥

અહોરાત્રૌ સદા પાતુ કર્મસાક્ષી પરન્તપઃ ।
આદિત્યકવચં પુણ્યં યઃ પઠેત્સતતં શુચિઃ ॥ ૭॥

સર્વરોગવિનિર્મુક્તો સર્વોપદ્રવવર્જિતઃ ।
તાપત્રયવિહીનસ્સન્ સર્વસિદ્ધિમવાપ્નુયાત્ ॥ ૮॥

સંવત્સરેણ કાલેન સુવર્ણતનુતાં વ્રજેત્ ।
ક્ષયાપસ્મારકુષ્ઠાદિ ગુલ્મવ્યાધિવિવર્જિતઃ ॥ ૯॥

સૂર્યપ્રસાદસિદ્ધાત્મા સર્વાભીષ્ટફલં લભેત્ ।
આદિત્યવાસરે સ્નાત્વા કૃત્વા પાયસમુત્તમમ્ ॥ ૧૦॥

અર્કપત્રે તુ નિક્ષિપ્ય દાનં કુર્યાદ્વિચક્ષણઃ ।
એકભુક્તં વ્રતં સમ્યક્સંવત્સરમથાચરેત્ ।
પુત્રપૌત્રાન્ લભેલ્લોકે ચિરઞ્જીવી ભવિષ્યતિ ॥ ૧૧॥

સ્વર્ભુવર્ભૂરોમિતિ દિગ્વિમોકઃ ।

ઇતિ શ્રીહિરણ્યગર્ભસંહિતાયાં શ્રીસૂર્યનારાયણદિવ્યકવચસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Suryadivyakavacha Stotram 5*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*